# ॥ श्री अन्नपूर्णा अष्टोत्तरशतनाम स्तोत्रम् ॥

अस्य श्री अन्नपूर्णा अष्टोत्तर शतनामस्तोत्र महामन्त्रस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः श्री अन्नपूर्णेश्वरी देवता स्वधा बीजं स्वाहा शक्तिः ॐ कीलकं श्री अन्नपूर्णाम्बा प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

[मूलमन्त्रवत् न्यास ध्यानादयः ]

अन्नपूर्णा शिवा देवी भीमा पुष्टिः सरस्वती ।
सर्वज्ञा पार्वती दुर्गा शर्वाणी शिववल्लभा ॥ १ ॥
वेदवेद्या महाविद्या विद्यादात्री विशारदा ।
कुमारी त्रिपुरा बाला लक्ष्मीः श्रीः भयहारिणी ॥ २ ॥
भवानी विष्णुजननी ब्रह्मादिजननी तथा ।
गणेशजननी शक्तिः कुमारजननी शुभा ॥ ३ ॥
भोगप्रदा भगवती भक्ताभीष्टप्रदायिनी ।
भवरोगहरा भव्या शुभ्रा परममङ्गला ॥ ४ ॥
भवानी चञ्चला गौरी चारुचन्द्रकलाधरा ।
विशालाक्षी विश्वमाता विश्ववन्द्या विलासिनी ॥ ५ ॥
आर्या कल्याणनिलया रुद्राणी कमलासना ।
शुभप्रदा शुभावर्ता वृत्तपीनपयोधरा ॥ ६ ॥
अम्बा संहारमथनी मृडाणी सर्वमङ्गळा ।

विष्णुसंसेविता सिद्धा ब्रह्माणी सुरसेविता ॥ ७ ॥

परमानन्ददा शान्तिः परमानन्दरूपिणी ।

परमानन्दजननी परानन्दप्रदायिनी ॥ ८ ॥

परोपकारनिरता परमा भक्तवत्सला ।

पूर्णचन्द्राभवदना पूर्णचन्द्रनिभांशुका ॥ ९ ॥

शुभलक्षणसम्पन्ना शुभानन्दगुणार्णवा ।

शुभसौभाग्यनिलया शुभदा च रतिप्रिया ॥ १० ॥

चण्डिका चण्डमथनी चण्डदर्पनिवारिणी ।

मार्ताण्डनयना साध्वी चन्द्राग्निनयना सती ॥ ११ ॥

पुण्डरीकहरा पूर्णा पुण्यदा पुण्यरूपिणी ।

मायातीता श्रेष्ठमाया श्रेष्ठधर्मात्मवन्दिता ॥ १२ ॥

असृष्टिः सङ्गरहिता सृष्टिहेतुः कपर्दिनी ।

वृषारूढा शूलहस्ता स्थितिसंहारकारिणी ॥ १३ ॥

मन्दस्मिता स्कन्दमाता शुद्धचित्ता मुनिस्तुता ।

महाभगवती दक्षा दक्षाध्वरविनाशिनी ॥ १४ ॥

सर्वार्थदात्री सावित्री सदाशिवकुटुम्बिनी ।

नित्यसुन्दरसर्वाङ्गी सच्चिदानन्दलक्षणा ॥ १५ ॥

नाम्नामष्टोत्तरशतं अम्बायाः पुण्यकारकम् ।

सर्वसौभाग्यसिद्ध्यर्थं जपनीयं प्रयत्नतः ॥ १६ ॥

इदं जपाधिकारस्तु प्राणमेव ततः स्तुतः ।

आवहन्तीति मन्त्रेण प्रत्येकं च यथाक्रमम् ॥ १७ ॥

कर्तव्यं तर्पणं नित्यं पीठमन्त्रेति मूलवत् ।

तत्तन्मन्त्रेति होमेति कर्तव्यश्चेति मूलवत् ॥ १८ ॥

एतानि दिव्यनामानि श्रुत्वा ध्यात्वा निरन्तरम् ।

स्तुत्वा देवीं च सततं सर्वान् कामानवाप्नुयात् ॥ १९ ॥

Sri Annapurna Ashtottara Shatanama Stotra is used for Japa and Archana by Upasakas of Avahanti mantra.
Sri Kamakoti Mandali [srigurupaduka@yahoo.com]